# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ५ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.C.- 3.5.9. New ) सन्दर्भग्रन्थः सत्सङ्गिजीवनम् | गुणाः – ७० |
| दिनाङ्कः – १४/१०/२०१९ | प्रकरणम्–४, अध्यायः ६२–६६ | समयः –३.०० तः ६.०० |

### प्रथमान्वितिः

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** **(१०)**

(१) पञ्चविषयाः कथं जेतव्याः ? स्पष्टयत।

(२) ''रसवेगश्च दुर्वार्यः सर्वं लोभात्प्रवर्तते।
तत्मात्सर्वाणि पापानि लोभमूलानि निश्चितम् ॥''
– इति श्लोकं हेतुटीकानुगुणं व्याख्यात।

(३) ''लोभात्क्रोधः प्रभवति लोभात्कामः प्रवर्तते।
लोभान्मोहश्च माया च मानश्च परतन्त्रता ॥'' इति श्लोकं सान्वयं व्याख्यात।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) लोभेन समुत्पन्नान् दोषान् हेतुटीकानुगुणमुपवर्णयत।

(२) लोभजयोपायान् यथाग्रन्थमुपपादयत।

### द्वितीयान्वितिः

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ।** **(१०)**

(१) काममाश्रित्य के के दोषाः वर्तन्ते ? यथाग्रन्थं लिखत।

(२) ''सुस्वादुभोजनासक्तिर्न कार्या त्यागिभिः क्वचित्।
योगैः सिद्धाः अपि यया लभन्ते श्वादितुल्यताम् ॥
– इति श्लोकं हेतुटीकानुसारं व्याख्यात।

(३) मनसः कामवासनाः कथं विनश्यन्ति ? स्पष्टयत।

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेयः।** **(१०)**

(१) कामजयार्थं प्रोक्तानि सद्व्रतानि उपवर्णयत।

(२) रसदोषजयोपायान् उपवर्णयत।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्। (१०)**

(१) स्नेहात् के के दोषाः भवन्ति ?

(२) मानदोषोत्पत्तिः कथम् ? स्पष्टयत।

(३) मानदोषप्रकारान् उपपादयत।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत। (१०)**

(१) स्नेहदोषतज्जयोपायान् पञ्चषष्ठितमाध्यायानुगुणं वर्णयत।

(२) मानदोषतज्जयोपायान् षट्षष्ठतमाध्यायानुगुणं वर्णयत।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः। (१०)**

(१) त्यागिनां धर्माः कस्मिन् प्रकरणे उपवर्णिताः ?

(२) त्यागिनां पञ्च प्रमुखधर्माः के ?

(३) पञ्चविषयाः के ?

(४) ''प्रत्यूहाः'' इति शब्दस्य कोऽर्थः ?

(५) त्यागिभिः विशेषतः कः जेतव्यः ?

(६) सर्वदोषाणाम् आश्रयः कः उच्यते ?

(७) त्रिषष्ठितमे अध्याये निरूपितः मुख्यः विषयः कः ?

(८) वर्णसाङ्कर्यं कस्मात् जायते ?

(९) त्यागिभिः प्राणात्ययेऽपि किं न हातव्यम् ?

(१०) सर्वेषामिन्द्रियाणां क्षोभहेतुः कः ?

(११) पञ्चषष्ठितमे अध्याये मुख्यविषयः कः ?

(१२) साधुना त्यागशालिना केनवत् वर्तितव्यम् ?

(१३) मानात् कस्योत्पत्तिः भवति ?

(१४) श्रीमत्सत्सङ्गिजीवनग्रन्थे कति प्रकरणानि सन्ति ?

(१५) श्रीमत्सत्सङ्गिजीवनग्रन्थरत्नस्य कर्ता कः ?

--००--